62339

Shri Raghunatha Temple MSS. Library,
JAMMU

6233

118 E-120

No. २५३३ ख

Title नरेश्वर परीक्षा

Author रामकण्ठ भट्टः

Extent १० पत्र Age सं. १९३८

Subject वेदान्त

© Dharmarth Trust. Digitized By eGangotri

ज्ञस्य प्रसंगादित्यविनश्वरेश्वरसिद्धिः नतु
नैवान्योभविष्यतीतिप्रवादनित्येश्वरवा
दिनः प्रतिक्षिपति ॥ हक्रियागुणवत्त्वाच्च
कारणाभावतश्चसः ॥ नित्यइत्यनुवर्तते
योहक्क्रियागुणयुक्तः सनित्योयथात्माह
क्रियागुणयुक्तश्चेश्वरस्तस्मादविनश्वरः
यश्चाकारणः सनित्योयथात्मादि अकारणश्चे
श्वरः प्रोक्तस्ततोप्यविनश्वरइतिनप्रवादनि
त्येश्वरवादः यदप्याहुः जगत्स्रस्तजनस्तस्य
किंप्रयोजनमुच्यताम् प्रयोजनमनुद्दिश्यन
मन्दोपिप्रवर्तते एवमेवप्रवृत्तिश्चेच्चेतनमेता
स्यकिंभवेदितितत्राप्याह ॥ मलाद्यभावत
स्तस्यचेष्टानस्वात्मभृतये पुत्रनापिस्वभोगा
यसर्वज्ञत्वादियोगतः ॥ निर्मलत्वेनप्राप्त
प्राप्तव्यस्यनतावत्तस्यपुरुषस्येवस्वात्मनोमा
हार्थ्यासर्वज्ञत्वाच्चनापिभोगार्थोमद्भविकल्पप
द्यते भोगस्याज्ञानानुबन्धित्वेनसर्वज्ञेनुपप
त्तेरकृतत्वाच्चापिक्रीडार्थस्यात् ॥ क्रीडार्थाद्यु
ज्यतेचेष्टासत्तानोक्तव्यतिरेकतः वर्तनेनविशे
षेनतस्यास्तेननिषेधतः ॥ क्रीडाद्यर्थमपि

© Dharmarth Trust. Digitized By eGangotri

ने.टे.
प.१८
१९

ननस्यचेष्टाउच्यते नह्येतत्त्वेनोक्तस्य मलादेव
निरेकाद्भावतः मलादिहेतुकादिपुरुषचेष्ट
क्रीडाहेति मलालादेस्तच्चनिषेधादेवतस्या
प्यपिनिषेधः नचक्तंभवद्भिरपि क्रीडार्थायांप्र
वृत्तौनविहृतेनाकृतार्थतेति इतश्चननस्यस्वा
र्थोक्रीडाद्यर्थोवाचेष्टेत्या ॥ किंचेशेआष्टेन
पुंसांभुक्तिमुक्तिश्चह्रूयपते चेष्टातःपुंफलायैव
स्वाभाव्यान्नस्यगम्यते ॥ प्राग्युक्तक्रमेणचमोक्ष
स्येश्वरव्यापारंविनानुपपत्तेस्तस्यपरार्थमेवचे
ष्टा परोपकारस्वाभाव्यादेवप्रतीयते नान्यतः मु
क्तेरीश्वरकर्तृत्वंप्रतिज्ञातंसाधयितुंस्वरूपमा
ह ॥ मुक्तिःपरेशतत्त्वंमेऽत्रमन्त्रेशतःपरा ॥
सर्वज्ञत्वकर्तृत्वस्वभावःपुरुषस्ययुक्तमतस्त
त्स्वरूपावाप्तिःपरमेशतत्त्वंपराशुक्तिःअपरा
तुवक्ष्यमाणमन्त्रमन्त्रेशतत्त्वतेति साचेश्वरेण
क्रियते नत्वात्ममोक्षवादिनामिवपुरुषेणेत्याह
॥ स्वयंकरोत्यणूनेतान्पाशरुद्धबलत्वतः ॥ न
नुज्योतिष्टोमाद्यनुष्ठानेनस्वर्गादिभोगवदात्मा
ज्ञानध्यानाद्यनुष्ठानात्पुरुषएवमोक्षंकरिष्य
तीतिपाशरुद्धबलत्वस्यमोक्षकर्तृत्वेनसहवि

110

© Dharmarth Trust. Digitized By eGangotri

रोधासिद्धेरनैकान्तिकता कः पुनरयं पाशोऽभिम
तो भवताम् नन्वज्ञानमेव तत्किं वस्त्ववस्तु वा
अवस्तुत्वे तस्य शशविषाणादेरिव निवृत्तत्वान्
न्निवर्तको ज्ञानानुष्ठानविधिरेषोऽनर्थक एव व
स्तुत्वे यदि पुरुषस्वभाव एव ततो नित्यत्वमाप
कत्ववदज्ञानहेतुत्वादनिर्मोक्षः व्यतिरेके त्वा
वरकस्वभावं चक्षुषः पटलादिवदज्ञानहेतु
त्वादज्ञानशब्दवाच्यं द्रव्यान्तरमेव तदभ्युपगन्त
व्यम् द्रव्यस्य चावरकस्य तमसः पटलादेरिव
ज्ञाननिवर्त्यस्वभावसिद्धेः पाशरुद्धबलत्वस्य
मोक्षकर्तृत्वेन सद्निरोधः सिद्ध इति नात्रानै
कान्तिकतेति नैर्हित्यप्रयोजनत्वात्पाशाः
स्वयमेव पुरुषं मुञ्चन्तीति सांख्यः यदाहुः
रंगस्य दर्शयित्वा प्रवर्तते नर्तकी यथा नृत्यात्
पुरुषस्य तथात्मानं प्रकाश्य विनिवर्तते प्रकृ
तिरिति श्रयाणाद ॥ पाशाश्चापि न कुर्वन्ति य
त्नलिन निरोधकाः न चापि वध्यतं बन्धविमुक्त
हृश्पतेयनः ॥ न ह्यात्यन्तपरिपाकात्कृतप्र
योजनत्वेन निश्चितोऽपि पटलादिः स्वयमावार
कत्वेन वा निवृत्तिस्वभावः सिद्धो येन मोक्षेप्येत

© Dharmarth Trust. Digitized By eGangotri

नवे·
प·र·
११

न्कल्प्यमानमुपपद्यते यतएतत् तस्मात् ॥
बलीयान्पशुपाशेभ्यस्तन्मोचकतयाहरः सप
वर्गमोचकस्तस्मात्सर्वस्माद्बन्धनात् ॥ च
क्षुरादेः पटलादिनिवृत्तावीश्वरप्रदेहनीत्यः
नवशक्तिरजतादिभ्रमेषु ज्ञानस्य ज्ञाननिवृ
त्तौ पुंसां सामर्थ्यसिद्धमतो मोहोपि तथैव भावि
ष्यतीत्याह ॥ पुंसो सापेक्षशक्तीनां सद्यानाद्
नशक्तिकाः युज्यन्ते शक्त्यभिव्यक्तौ नेत्राणां भानु
मानिव ॥ इह प्रथमकाण्डोक्तज्ञानवद् ज्ञान
मपि द्विविधमध्यवसायात्मकमेव विषयसा
दृश्यादिविवेकेन शुक्तिकारजतादिषु विपरीत
ज्ञानात्मकमुत्पद्यते इत्युक्तैवनस्य प्रतिपत्त
भूतानामयथार्थज्ञानानां निवृत्तिः यत्त्वनध्यवसाया
त्मकेन द्रव्यान्तरादष्टकरादेर्भवत्वस्य हेविप
ह्लाद्रव्यान्तरादेवादित्यादेर्निवृत्तिस्वभावं सि
द्धेन प्रतिपत्तृज्ञानात् अनध्यवसायात्मकं च
पौरुषमज्ञानं तद्भावस्यास्ति यदेवं प्रतिपा
दितं अध्यवसायात्मनो बोद्धत्वादतस्तदपि
स्वदेहविपक्षभूतादीश्वरादेववस्त्वन्तरा
न्निवृत्तिस्वभावमनुमीयते इति सपवमोच

© Dharmarth Trust. Digitized By eGangotri

देहः सिद्ध्यति न त्वात्मनस्तज्ज्ञानस्वातन्त्र्यसामर्थ्या
सिद्धेरित्यदोषः ॥ कथं तर्ह्यात्मानामनन्तवश्यत्वाद्याः
शक्तयः स्यात् ॥ एष्टव्यं चेदृशं तत्त्वं कान्यथास्य
क्तिसंभवः ॥ नाप्यप्रत्यक्षेश्वरप्रतिपत्तिकर्त
व्यतानिष्टापत्याभ्युपगन्तव्यात्स्वक्रम् अन्यथा
मोक्षायोगात् न च वरमस्मोक्षोऽस्त्वनत्वीश्वरस्य
त्यनिर्मोक्षवादिनः यदाहुः अनादित्वाद्भवः
पुंसां न कदाचिन्निवर्तते ततः स्वभावत एव प्राप्ति
निवृत्तेः शास्त्रतः स्मृतेरित्याशयात् ॥ भवितव्यं
तयापि संसो सर्वावाप्यर्हताप्रुवम् ॥ सर्वावरणानि
वृत्तिस्वभावाः पुरुषाः आवरणप्रकर्षापकर्षा
भ्यां मूढप्रायवस्थास्वपकृष्टप्रकृष्टतत्त्वरूपेपु
मेयायूत्सर्वित्ववदिति नानिर्मोक्षोऽभ्युपगन्त
व्यस्तत्रेश्वरासिद्धिः न च भवस्यानादित्वं क
र्मदेहत्वाद्युक्तम् कर्म न च शरीराणि विष
याः करणानि चेति न चागमविरुद्धोऽयं पक्ष
इत्याह ॥ ईशान्मोक्षोऽन्यथा नैव पुंसामेतन्नि
रूपितम् ॥ तथा च श्रीपौष्करे न मोक्षं यान्ति
पुरुषाः स्वसामर्थ्यात्कदाचनेति श्रीमद्रौरवोत्त
रेऽपि शिवादेवात्मनां मोक्ष इति ईश्वरव्यापारा

© Dharmarth Trust. Digitized By eGangotri

नरे॰
प॰ नर
११२

स्मकत्वाद्भदीक्षायाः श्रीमत्स्वायंभुवेपिनिह्नु।
पितं दीक्षैवमोचयत्यूर्ध्वं शैवंधामनयत्यसावि
ति नत्वेवमपिकेषांचिदनिर्मोक्षदर्शनादीश्व
रेरागद्वेषसंभावनेस्याद् ॥ नरागोनापिद्वेषस्त
स्यत्येनस्त्रयुक्तितः ॥ ईश्वरस्यरागद्वेषाद्यभा
वइतिनिह्नापितंमथ्यकाण्डपूर्वेप्यमपिनदो
षः नचानुरूपार्थभूतत्वाद्वैशेषिकादीनामि
वायमपिमोक्षोनकेनचिदाश्रीयतइत्याद् ॥
वाञ्छाचारणीःसदैवास्तिसर्वस्येवोत्तमेपदे ग्र
नस्तक्रीयमानंत्तनकदाचित्तुमन्यते ॥ नहिस
र्वेवत्सनिवृत्त्यासर्वैश्वर्यप्राप्तौकश्चिन्निरभिला
षः संभवतीति यद्येवमीश्वरस्यानिरपेक्षत्वा
त्कथंनयुगपत्सर्वेषांमुक्तिरित्याद् ॥ अएवत्वनु
ग्रहसामर्थ्यंसर्वथाचास्तिशंकरे तथापियुग
पन्मुक्तिर्नोत्पत्त्यांतेनदृश्यते ॥ ऊनइत्याद् ॥
स्वष्टोयोनेर्यथाकालंसदेशानोव्यपेक्षते प्रोत्सा
रणेतथाकालंमलस्यासावपेक्षते ॥ यथाहि
मायातःस्वर्गव्यपेक्षं कर्मपरिपाककलापेक्षं
त्वेनभगवतोनयुगपत्सर्वभोगप्रदत्वमित्युक्त
प्राक् एवंमोक्षनिमित्तंमलपरिपाकपेक्षित्वा

© Dharmarth Trust. Digitized By eGangotri

त्र्युगपत्सर्वेषां मोक्षप्रसंगो निरपेक्षित्वस्यैवा
सिद्धेः अत्र पराभिप्रायमाह ॥ अपरेपि स्वतं
त्रेशे रोचन्ते ये यथा यदा पुमांसस्तस्मै देवाय
तेषां भुक्तिस्तदा तथा ॥ स्वतंत्रो हि परमेश्वरः
शक्तत्वेनात्मानपेक्षणात् अन्यानपेक्षणात् अ
न्यापेक्षायां न सापेक्षस्य सामर्थ्यं भवतीत्यसमर्थ
एवेश्वरः स्यात् अतो ये यथा परापरभुक्तिसंव
धितया तस्मै रोचन्ते तं तथैव योजयति न तु मल
परिपाकाद्यपेक्षयति एतत्प्रतिक्षिपति ॥ पु
नर्भवप्रसंगः स्यात्स्वातंत्र्यादिति नो यतः ॥ नै
न घनो मोक्षवत्संसारेपि कर्तव्येसौ स्वतंत्र एवे
ति मुक्तस्यापि पुनः संसारं कुर्यादुक्तमिति नोपि
स्वर्गसृक्तिनश्च नरकमिति मोक्षशास्त्राणां
सत्कर्मानुष्ठानानां चानर्थक्यालोकायतमेवो
पास्यो भवताम् अथ तत्र कर्मविपाकापेक्षया नै
घप्रसंगस्त्वच्यते यद्येवम् ॥ स्वभावस्तस्यैते
नाहं क्रमिणः शंकरस्य हि ॥ ननु हीनपेक्षस्व
भावः सिद्धो सा विनिभोगेपि कर्मविपाकमिव
मोक्षे मलविपाकमपेक्षिष्यते इति को विरोधः
न च कर्माद्यपेक्षितैवास्वातन्त्र्यमपित्वीश्वरा

© Dharmarth Trust. Digitized By eGangotri

113

न्तरायायज्ञता साचनस्यपरमेश्वरत्वाद्देवता
त्वीत्युक्तंमध्यकाण्डे किंचआगमविरुद्धोयंप
क्षइत्याह ॥ उक्तंचतेनतत्त्वल्पःप्राप्नोतिनभ
वान्तरम् प्रतिपादयितुंशक्यंनापिमिथ्येति
तद्वचः ॥ तथाहिश्रीमत्स्वायंभुवादौ अनाद्य
शुद्धिरूपत्वात्प्राप्नोतिनभवान्तरम् इतियदुक्तं
तत्त्वतंत्रशक्तिपातपक्षेनोपपद्यते पुनर्भव
प्रसंगस्यतत्रावश्यंभावात् इत्युक्तयुक्तःनचपा
रमेश्वरंवचनमप्रमाणमित्युक्तंप्रागेव ततः
पुनर्भवप्रसंगासिद्धेर्नस्वतंत्रःशक्तिपातोपित
परिमलपाकापेक्षएवेतिनयुगपत्सर्वेषांमो
क्षप्रसंगः यथाचमलपरिणतेरपिनैषप्रसं
गस्तथोक्तमाचार्येणतत्त्वत्रयनिर्णयएवेतित
नएवावधार्यम् ग्रन्थान्तरेणस्वातंत्र्यंशक्तिपात
स्यसमर्थयितुमागमार्थसंक्षिपति ॥ यस्मा
पुमर्थसिद्ध्यर्थंस्पष्टमन्त्राःसनायकाः तेषामेको
पितत्कर्तुंशक्तोनिबद्धभिस्तुकिम् ॥ सप्तको
टिसंख्यानामंत्रा अष्टावनन्तेपादयोमन्त्रेशाभ
गवतापुरुषार्थसिद्धयेनिर्मिताइत्यागमार्थंप
केनैवतत्सिद्धेरयुक्तइति पतत्प्रतिक्षिपति ॥

© Dharmarth Trust. Digitized By eGangotri

अनुग्रहोपि संभूतिस्तेषां चानुग्रहादतः कृते
नियोगः शैवोक्तो नैतस्यासिद्धिकृतनसिद्धये ॥ बहूनां
हि नदानीं तुल्ययोग्यतयादरोनुग्राह्यमंत्रमंत्रेश्व
रत्वेन युगपदनुग्रहोन त्वधिकारार्थमेवोत्पत्ति
रित्युपज्ञोनावश्चदोषः नन्वधिकारो भविष्यति
नात्र एवात्र शक्तिपातस्वातंत्र्यासिद्धेरदोषः अत्र
एवः नन्वनुग्रहनः शैवाज्ञानानास्तुल्यबलास्तेन
प्रेर्यप्रेरकभावो हि तेषां तेन युज्यते ॥ मंत्रमंत्रे
श्वराणां परमेश्वरानुग्रहान्मुक्तात्मनामिव शि
वसमानत्वमेवेति तेधिकारे प्रकुर्वंति शिवेच्छा
विधिचोदिताः इत्यादिकृतिविरोधस्तं परिहरति
॥ सर्वज्ञानोदयस्तुल्यस्त्वाधिपत्यं विशिष्यते
नाभिव्यक्तं हि तन्नाद्ये तेषां यादृक्परेश्वरः ॥ अ
त एव शिवेच्छाविधिचोदितत्वश्रुत्यन्यथानुप
पत्त्यानेषां मुक्तशिववत्क्रियाशक्त्यापि शिवस
मत्वमभिव्यक्तमिति प्रतीयते पि तु सर्वज्ञान
संपन्ना इति कृते तेन शक्येवेम्य विरोधः अपिच
॥ अधिकारो हि संस्कारास्तेषां शैवे विगीयते
यतः कृताधिकारास्ते भुंजंति शिवतुल्यतां ॥
यतः परमेश्वराणामाधिकारात्मकः संस्कारस्ते

© Dharmarth Trust. Digitized By eGangotri

ने.वे.
प.त्र.
११४

षांसावधिरेवविहितः यन्नूयते अनंतोपरमे
तेषांमहतांचक्रवर्तिनाम् विहितंसर्वकर्तृत्वा
कारणंपरमेपदमितितोपिनशिवसमानत्वम्
। अत्रमतांतरमाह ॥ तत्त्वत्वेपथ्यनिष्ठाज्ञिनो
न्यथेतिपरेजगुः शिक्षाश्चगुरोःशंभोस्तेन
क्षितनियोगिनः ॥ शिवतत्त्वत्वेपिमंत्रमंत्रेश्व
राणांतदीयाधिकारकारित्वमिवशिक्षाणांभ
विष्यतीतिकेचित् तैस्तुदृष्टान्तेनसम्यमंत्रवि
नयम् शिक्षाणांहिगुरुसाम्येपितदीयनियोग
करणान्नुपपत्तायोगपता नतुतेषांशिवसमत्व
यतःप्राक्शरीराभ्युपगमेनेश्वरस्यकारकत्वंप्रति
पादितमधुनान्यनिक्षेपेणाह ॥ इच्छामात्रेणदे
वेशःकृतकृत्यप्रयासतः इच्छाचतस्यकृत्येष्वन
प्रतीघातमश्नुते ॥ मात्रग्रहणमवधारणार्थ
म् इच्छयैवाघ्रातमसरयाभगवतःकर्तृत्वंन
शरीरकरणादिप्रयासेनेतितेषामभावोनुपयो
गात् नतुयःकर्तानासौशरीरादिप्रयासानपे
क्षः अव्याहतेच्छोवा यथादेवदत्तादिःकर्ताचश
रीरतस्तथाभूतएवेत्यत्राप्याह ॥ प्रयासकरण
त्वेसामिच्छाव्याघातधर्मिणी पशुत्वात्तश्चदेवस्य

© Dharmarth Trust. Digitized By eGangotri

निषिद्धेनापायवर्त्मना ॥ सर्वज्ञत्वसर्वकर्तृत्व
सद्भावेपिपुंसांमलावृतत्वात्कार्येशरीराद्यपे
क्षित्वमनीश्वरत्वंचेत्युक्तम् ईश्वरस्यतुतदभा
वाद्दयोरप्यभावः नचेच्छामात्रेणपुंसाकर्तृत्व
मदृष्टमित्याह ॥ क्षोभादिकर्मसंसिद्धिरिच्छा
मात्रेणादृश्यते पुंसांप्रकृष्टमंत्रादिस्वभावावि
द्धचेतसा ॥ सिद्धमंत्राणांहिविषादिकार्यमि
च्छामात्रेणपुरुषाणामपिदृश्यतएव एतदेवद
र्शितं ॥ पशुर्बन्धनबन्धीसप्रभावातिशयाद्धि
तम् इच्छयैवकरोतीशःकुर्यात्तेनकिमद्भुतम् ॥
बन्धनानांविषादीनांबन्धाःक्षोभादिःप्रागुक्तः
सयस्यास्तिसपशुः कार्यकरणाकारणायुक्तःप्रा
गुक्तएवपुरुषोमन्त्रप्रभावातिशयादिच्छामात्रेण
तंक्षोभादिकंकरोतीष्यते नत्वीश्वरस्तथाभूत
प्रभावातिशयइत्याश्चर्यम् यदप्याहुःकेचित् न
चानिमित्तयाउक्तमुत्पन्नंहीश्वरेच्छया यद्वातस्य
निमित्तंवस्तुद्भूतानांभविष्यतीतितत्राप्याह ॥
इच्छायाकारकग्रामःस्पष्टाकेचिन्नचक्षते निमि
त्तंवस्तुमोक्षादिनत्वानंकरणंविति मोक्षोत्पादा
दिवस्तुयोग्यतैवेच्छायाःसमुत्पादेनिमित्तमस्त

© Dharmarth Trust. Digitized By eGangotri

नरे॰
प॰र॰
११५

दादौ तथैवसिद्धेः करणांतद्विषयंकर्तृज्ञानमि
तीश्वरेपितथैवयोपपन्नेर्नकिंचिद्देनतत् एकानेक
विभेदोपितस्यानादेरेकश्स्यात् ॥ एककाल
विनिष्पादेष्वेकरूपेष्ववस्तुषु एकैवेच्छातथाने
काकालरूपविभेदिषु ॥ स्थितिसंहरणादि
विषयाकारभेदाभेदाभ्यांस्थित्यादावपिकालभे
दाभ्यामस्याभेदाभेदावितिनादेहकौ साचक्रिया
क्रैनीत्येस्यात् ॥ वामादिकःक्रियाशक्तेर्भेदोयःसो
प्यगम्यते इच्छायाःसर्वकृत्यानितयैवेशःकरोति
यत् ॥ यतःसर्वकार्येषुस्वदादीनामपीक्षेवावि
नाभाविनीकारकतयासिद्धेस्तुक्रमेमध्यकाण्डे त
तःसैवक्रियाशक्तिर्वामादिभेदैर्भिन्नाभगवतः
शास्त्रेप्रतिपादितेत्यवगन्तव्यं नततोभेदितस्या
प्रसिद्धेःसाचनिरवयवत्वात्स्वरूपाव्यतिरेका
दात्मरूपायाज्ञानशक्तेरप्यभिन्नेतिदृष्टान्तेनद
र्शयति ॥ गुरुभिःकमलाक्षिशयथैवार्कस्य
दीधितिः तत्प्रकाशोविकासंचकरोतीतिद्विधोच्य
ते ॥ तथैवशक्तिरेकैवसङ्क्षेपादेववस्तुषु चित
श्चिंतक्रियांचैवकरोतीतिद्विधोच्यते ॥ यथा
हिसवितृदीधितिःकमलेषाक्षिशप्रबोधप्रका

© Dharmarth Trust. Digitized By eGangotri

काशो विदथनी हि योच्यते तथैव भगवतः शक्तिव
न्तश्च प्रकाशविकासो विदथनी हि विधेति कार्य
भेदाद्भेदेन व्यपदिश्यते न तु परमार्थतो भेदोस्याः
स्यादिति तथैव ॥ तेयापि श्रेयलिङ्गाद्यभेदादेका
पि भिद्यते वासादिभिरनेकैस्तु भेदैः शक्तिर्न तु स्व
तः ॥ ज्ञानशक्तेर्ज्ञेयभेदेनैव क्रियाशक्तेः कार्य
भेदेन च इच्छाशक्तेः प्ररूपरीक्षायाम् ततश्च वासादिभे
दोपि न स्यात् कार्यभेदोपाधिको न मुख्यत इति यते
व सिद्धेव क्रियाशक्तिः ॥ प्रयासेन विनेशानः कु
तत्कर्तेव गीयते ॥ तेन कारणेन स्वदेहस्पन्दादे
रम्भकारादिरिवेश्वरोपि शरीरान्तरप्रयासान
पेक्षया जगति कर्ता प्रोक्तो नान्यथेति श्रत्रपरः ॥
इच्छामात्रात्करोतीति न त्विच्छा नास्य विद्यते ॥ यु
क्तमेतदुक्तं यदीच्छास्य संभवेत् सा तु मनोवृत्तित्वा
दस्य च कार्यकरणानभ्युपगमेन मनसो संभवादसं
भवतीति एतत्प्रतिक्षिपति ॥ शक्तेः प्रवृत्तिः कु
तो विशिष्टप्रोक्तलक्षणा व्यापाराकारणस्येच्छा
नियोगाय चोच्यते ॥ तेच्छा मनोवृत्तिरपि तु क
र्तुः क्रियाशक्तेः कार्याय प्रवृत्तिर्येच्छेत्युच्यते सर्व
व्यापारेष्वमीश्वरस्य व्यापारतया व्यापारनियोगाय

© Dharmarth Trust. Digitized By eGangotri

ने.टे.
प.ल.
११८

118

पूर्वभावित्वेनास्याः सिद्धत्वादित्यक्रमम् यतःशास्त्रे
ष्वपीश्वरस्य व्यापारतया व्यापारनियोगाय विशेष
रेषु चोच्यते यदुक्तं नैपिकारं प्रकुर्वन्ति शिवेच्छा
विधिचोदिताः इति कथं नहीच्छा मनोवृत्तिः सांख्या
दिभिर्गीयत इत्याह ॥ नात्रव्यापारसंगीना शक्ति
रिच्छा कचिन्मता ॥ यथादिव्यवसायादिना बुद्धि
व्यापारेणोपोद्बलितत्वाज्ज्ञानशक्तिरेव बुद्धिबोध
इत्युच्यते ननु बुद्धिर्जनितया वस्तुनो बोधः संभव
त्येव क्रियाशक्तिरेवेच्छात्मिका मनोव्यापारेणम
नोराज्यायवस्थास्तु सिद्धेनापूर्वनिर्माणशक्तिरु
पपद्यते निर्माणस्येश्वररूपत्वेन जडेऽनुपपत्ते
रिति अस्मिंस्तु शास्त्रे ॥ अर्थान्तरं विनाकृत्यं
कुर्वती च प्रगीयते ॥ मनोलक्षणार्थान्तरं वि
नैश्वरस्य कार्यं कुर्वतीच्छा गीयते सकलस्य तु
मनोलक्षणार्थान्तरानपेक्षयेति च शास्त्रार्थः उप
संहरति ॥ एका सर्वार्थगा शक्तिर्भिन्ना चेच्छा
न ज्ञानचित् ॥ एवं ज्ञानक्रियात्मिका शक्ति
रेकैव नैव चेच्छा ततोऽन्येति सिद्धम् ननु कार्यभे
दादिच्छायास्तु नः शक्त्यन्तरत्वमस्तु यद्वत्प्रमा
णानां प्रकाशरूपत्वेन सत्त्वादिप्रकाशनामिव

© Dharmarth Trust. Digitized By eGangotri

बोधात्मकत्वाज्ज्ञानरूपत्वमेवनक्रियाशक्तिरूपते
स्यात् ॥ शक्तावुक्तंयतोस्तीदंतेननाधिककल्प
ना ॥ क्रियाशक्तिसिद्धिनिमित्तंयज्ज्ञानमुक्तंत
देवेच्छायांयतोस्तितेनकारणेननतोधिकाका
चिदिच्छा नापिज्ञानरूपेणेति एतदुक्तंभवति स्व
देहस्पन्दादिक्रियाहेतुत्वेनस्वसंवेदनात्मकसा
धनसिद्धाक्रियाशक्तिरिच्छैव वस्तुनश्चप्रत्युत्पाद
नीनशाश्वद्भासितस्यममेदस्यात्मसंबंधिता
निर्माणस्वभावत्वाज्ज्ञानरूपापितत्क्रियाशक्तिरे
वेति तदिदमुक्तंमंत्रवार्त्तिके शाक्तस्यादितमन
सस्त्विच्छाह्येषाक्रियाशक्तिरिति तदेवमिच्छा
मात्रेणदेवेशःकृत्स्नकृत्प्रयासस्तइतिसिद्धम्
ननुसिद्धसाधनमेतदित्याह ॥ नचापिविमति
नोस्तिसर्वस्यैषाप्रसिद्धितः ॥ ननुमीमांसक
बौद्धलोकायतिकानामेतन्सिद्धमितिनसिद्धसा
धनम् नह्येषसिद्धएवायंपक्षःस्यात् ॥ तथापि
विगतस्तांतिग्राह्यःपक्षोयथागमम् ॥ यद्यपिवि
मतानामयंपक्षोभवद्भिर्नीतस्तथापिविगतप
क्षांति अत्रांतिकंकृत्वासद्धपदर्शितस्याद्रेतो
रयंतंपरीक्षांविधायग्राह्योनोपरोधेनेति ननुसि
द्धसाधनमेतदितिसांख्यः योगिनामस्त्वात्मनःकर्म

© Dharmarth Trust. Digitized By eGangotri

नरे॰
प॰र॰
१७

जैश्वर्यस्यानैरभ्युपगमात् यदुक्तं धर्मेणगमनमूर्ध्व
गमनमधस्ताद्भवत्यधर्मेण । ऊर्ध्वं सत्त्वविशालो स्त
मोविशालश्च मूलतः सर्गः मध्ये रजोविशालो ब्रह्मा
दिः स्तंबपर्यंत इति सत्त्वाद्यात् ॥ सर्वोत्थिपरमैश्व
र्यं कर्माभावान्नधर्मजम् अपास्तातिशयाद्धर्मोस्ते
नस्वेच्छाविधायिसौ ॥ अन्यदेवतद्योगिनां परिमित
मैश्वर्यं कर्मजत्वान्नत्वयातिशययुक्तं चतेविद्यते
अदेवत्विदं सर्वार्थविषयमाद्यन्तरहितत्वेन प्रति
पादितत्वात् कर्मजमिच्छामात्रकारकत्वेन प्रतिपा
दितमितिनसिद्धसाधनता नचततोपि प्रकृष्टैश्व
र्ययुक्तोन्योभविष्यतीत्यात् ॥ स्वात्मैश्वर्यप्रभावे
णतद्येनात्यातिशय्यते महेश्वरः स एव स्यादपीनै
वेश्वरस्तदा ॥ नर्हि स एव परमेश्वरोस्माभिर्वि
क्षतइत्यदोषः नचततोप्यन्योभविष्यतीत्यनवस्थे १७
त्याह ॥ परिणामदैश्वर्यं सर्वत्रातिशयान्वितं क्वा
चित्फातिशयपास्तं यत्र तत्स महेश्वरः ॥ योति
शयान्वितः स संभवन्क्वचित्प्रकर्षपर्यन्तावस्थिति
नेत्वनवस्थायुक्तो यथा परमाणुतो महत्महत्त्वाति
शयान्वितः क्वचिदेवस्थितः परममहत्त्वान्तः परि
माणः अतिशयान्वितश्चायमैश्वर्यविशेष इतिसो
पिसंभवन्क्वचित्प्रकर्षपर्यन्तावस्थितिः यत्रतत्

© Dharmarth Trust. Digitized By eGangotri

याभूतः सएवपरमेश्वरः इतितानवस्था ॥ प्रकरण
मुपसंहरन्नेवं प्रयोजनमस्यादावाह ॥ एवंसर्वोत्तमंशं
भुं ज्ञात्वा सर्वफलप्रदम् यदालोकयतः श्रेयः स
द्यः सर्वं चनात्मनः ॥ एवमत्रप्रदर्शितसाधकबा
धकप्रमाणसहस्रज्ञानिश्चयः सर्वप्रोक्तेनयेनदर्श
नान्तप्रसिद्धेभ्यः प्रकृतिपुरुषादिभ्य ईश्वरेभ्यः सा
तिशयमीश्वरमतएवसर्वफलप्रदंज्ञात्वातमे
वभावयतस्ततएवदीक्षाक्रमेणावलंबतः पर
श्रेयोमुक्तिः सिद्धिश्चभवतीतिप्रयोजनसिद्धिरि
त्युक्तमस्माभिरन्यत्र ॥ प्रणमतशिवनाथंशास्त्र
नंशमिहेतोविनविवयचमेवङ्ग्रेहंप्रोख्यत्ता
न् नसभवन्तिभवेस्मिन्नापिभूतोनभावीतदि
नरज्ञतितोयः शर्मयुक्तः पुमान्स्यादितिअधुनो
पसंहरति ॥ इमेशार्वपरीक्षांतंडंपरीक्षः पुरः
सराम् चकाररुद्रबुद्धीनोहितायातिस्फुटा
मिमाम् ॥ सद्योज्योतिः समानोयंशिवेनशक
सन्नमः कृपयैवानुजग्राहरुद्रज्योतिर्गुणाक
रः ॥ एवंचसर्वनयेनेश्वरपरीक्षादिभिर्वन
रपरीक्षितिनिनप्रयोजनेनैवसप्रयोजनेतिसिद्ध
म् ॥ ॐ नरेश्वरपरीक्षणेतिगदहनत्वतोनैव

© Dharmarth Trust. Digitized By eGangotri

नरे॰
प॰र॰
११८

118

यद्गतिर्निगतिर्निगम्यते विततबुद्धिवेगिभिरपि ॥ इदं
परिहृते स्वयात्वयात्वनन्तरामकण्ठस्ततः कृतकं
नमसांत्वदोविहितवान्यकाशात्स्फुटम् ॥
इति श्रीनारायणकण्ठसूनुभट्टरामकण्ठकृतौ
नरेश्वरपरीक्षाप्रकाशे तृतीयं काण्डम् समाप्तमिति ॥
यादृशं पुस्तकं दृष्ट्वा

विक्रमादित्यसंवत् १५ ३८ वैशाखकृष्णचतुर्दश्यां
बुधे श्लोकसंख्या शतं २५ [illegible]
लिखितम् [illegible]

© Dharmarth Trust. Digitized By eGangotri